# Purushottamaproktam Shivarajnishri Hridaya Stotram

# પુરુષોત્તમપ્રોક્તં શિવરાજ્ઞિશ્રીહૃદયસ્તોત્રમ્

## Document Information

Text title : Purushottamaproktam Shivarajnishri Hridaya Stotram

File name : puruShottamaproktaMshivarAjnishrIhRRidayastotram.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, hRidaya, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 121/1-37||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# પુરુષોત્તમપ્રોક્તં શિવરાજ્ઞિશ્રીહૃદયસ્તોત્રમ્

શ્રીનારાયણીશ્રીરુવાચ ।
લલિતાખ્યમહાલક્ષ્મ્યા નામાન્યસઙ્ખ્યકાનિ વૈ ।
તથાપ્યષ્ટોત્તરશતં સપાદં શ્રાવય પ્રભો ॥ ૧॥

શ્રીપુરુષોત્તમ ઉવાચ ।
મુખ્યનામ્નાં પ્રપાઠેન ફલં સર્વાભિધાનજમ્ ।
ભવેદેવેતિ મુખ્યાનિ તત્ર વક્ષ્યામિ સંશ‌ૃણુ ॥ ૨॥

“લલિતા શ્રીર્મહાલક્ષ્મીર્લક્ષ્મીઃ રમા ચ પદ્મિની ।
કમલા સમ્પદીશા ચ પદ્માલયેન્દિરેશ્વરી ॥ ૩॥

પરમેશી સતી બ્રાહ્મી નારાયણી ચ વૈષ્ણવી ।
પરેશ્વરી મહેશાની શક્તીશા પુરુષોત્તમી ॥ ૪॥

વિભ્વી માયા મહામાયા મૂલપ્રકૃતિરચ્યુતી ।
વાસુદેવી હિરણ્યા ચ હરિણી ચ હિરણ્મયી ॥ ૫॥

કાર્ષ્ણી કામેશ્વરી કામાક્ષી ચાપિ ભગમાલિની ।
વહ્નિવાસા સુન્દરી ચ સંવિચ્ચ વિજયા જયા ॥ ૬॥

મઙ્ગલા મોહિની તાપી વારાહી સિદ્ધિરીશિતા ।
ભુક્તિઃ કૌમારિકી બુદ્ધિશ્ચામૃતા દુઃખહા પ્રસૂઃ ॥ ૭॥

સુભાગ્યાઽઽનન્દિની સમ્પદ્વિમલા બિન્દ્વિકાઽભિધા ।
માતા મૂર્તિર્યોગિની ચ ચક્રિકાઽર્ચા રતિર્ધૃતિઃ ॥ ૮॥

શ્યામા મનોરમા પ્રીતિઃ ઋદ્ધિઃ છાયા ચ પૂર્ણિમા ।
તુષ્ટિઃ પ્રજ્ઞા પદ્માવતી દુર્ગા લીલા ચ માણિકી ॥ ૯॥

ઉદ્યમા ભારતી વિશ્વા વિભૂતિર્વિનતા શુભા ।
કીર્તિઃ ક્રિયા ચ કલ્યાણી વિદ્યા કલા ચ કુઙ્કુમા ॥ ૧૦॥

પુણ્યા પુરાણા વાગીશી વરદા વિભવાઽઽત્મિની ।
સરસ્વતી શિવા નાદા પ્રતિષ્ઠા સંસ્કૃતા ત્રયી ॥ ૧૧॥

આયુર્જીવા સ્વર્ણરેખા દક્ષા વીરા ચ રાગિણી ।
ચપલા પણ્ડિતા કાલી ભદ્રાઽમ્બિકા ચ માનિની ॥ ૧૨॥

વિશાલાક્ષી વલ્લભા ચ ગોપી નારી નરાયણી ।
સન્તુષ્ટા ચ સુષુમ્ણા ચ ક્ષમા ધાત્રી ચ વારુણી ॥ ૧૩॥

ગુર્વી સાધ્વી ચ ગાયત્રી દક્ષિણા ચાન્નપૂર્ણિકા ।
રાજલક્ષ્મીઃ સિદ્ધમાતા માધવી ભાર્ગવી પરી ॥ ૧૪॥

હારિતી રાશિયાની ચ પ્રાચીની ગૌરિકા શ્રુતિઃ ।
ઇત્યષ્ટોત્તરશતકં સપ્તવિંશતિરિત્યપિ ॥ ૧૫॥

લલિતામુખ્યનામાનિ કથિતાનિ તવ પ્રિયે! ।
નિત્યં યઃ પઠતે તસ્ય ભુક્તિર્મુક્તિઃ કરસ્થિતા ॥ ૧૬॥

સ્મૃદ્ધિર્વંશસ્ય વિસ્તારઃ સર્વાનન્દા ભવન્તિ વૈ ।
"ૐ શ્રીલલિતામહાલક્ષ્મ્યૈ નમઃ શ્રીંહ્રીઙ્ક્લીં સ્વાહા" ॥ ૧૭॥

ઇતિ મન્ત્રં જપેલ્લક્ષવારં સા દૃશ્યતે ધ્રુવમ્ ।
અથ લક્ષ્મિ મહામન્ત્રં ગુરુમન્ત્રં વદામિ તે ॥ ૧૮॥

"ૐ અન્તર્લિઙ્ગાય ગુરવે લલાટસ્થાય
સર્વાત્મને નમઃ સ્વાહા" ।
ઇતિલક્ષં જપેત્ સિદ્ધિર્જાયતે બ્રહ્મસાદૃશી ॥ ૧૯॥

ગુરું ધ્યાયેત્ સ્નાપયેચ્ચ પૂજયેદ્બહુવસ્તુભિઃ ।
ભોજયેત્સમ્પ્રસેવેત તોષયેત્સર્વદાનકૈઃ ॥ ૨૦॥

ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુર્ગુરુઃ શ્રીશઙ્કરઃ સ્વયમ્ ।
ગુરુર્નારાયણઃ કૃષ્ણો ગુરુર્બ્રહ્મપરં પ્રભુઃ ॥ ૨૧॥

ગુરુઃ પિતા પતિઃ પુત્રો બન્ધુર્માતા ચ રક્ષકઃ ।
મોક્ષદસ્તારકશ્ચાપિ મહાઽઽનન્દપ્રદો ગુરુઃ ॥ ૨૨॥

અનાદિશ્રીકૃષ્ણનારાયણઃ સાક્ષાદ્ગુરુર્હરિઃ ।
ઇત્યુક્ત્વા પ્રણમેતાપિ નીરાજયેદ્ગુરું તતઃ ॥ ૨૩॥

પુષ્પાઞ્જલિં દિશેચ્ચાપિ દણ્ડવદ્વૈ સમાચરેત્ ।

દાનં દદ્યાચ્ચ ગુરવે સ્વેષ્ટતમસ્ય વસ્તુનઃ ॥ ૨૪॥

ચેતનો વૈ ભગવાન્ સ ગુરુરેવ પરેશ્વરઃ ।
ત્રાયતે ચાપદાં વ્રાતાન્નયત્યેવાઽક્ષરં પદમ્ ॥ ૨૫॥

નિત્યં વૈ પ્રથમં પ્રાતર્ગુરોર્દર્શનમુત્તમમ્ ।
ગુરોઃ પાદાઙ્ગુષ્ઠજલં પિબેત્ પાવનમુત્તમમ્ ॥ ૨૬॥

અપિ હત્યાદિપાપાનાં નાશકં ચરણામૃતમ્ ।
અપિ માયાદિબન્ધાનાં કર્તનં ચરણૌ ગુરોઃ ॥ ૨૭॥

યામપાશવિમોક્ષાય શક્તં વૈ સ્મરણં ગુરોઃ ।
અનાથાનાં સદા નાથો નારાયણો ગુરુઃ પરઃ ॥ ૨૮॥

ગં ગાઢં ચ તમો ગુપ્તં રુણદ્ધીતિગુરુર્મતઃ ।
ગુરોર્મૂર્તિં શુભાં કૃત્વા ગૃહે કણ્ઠે પ્રરક્ષયેત્ ॥ ૨૯॥

ગુર્વદ્વૈતમુપાસીતાઽશ્નુતેઽમૃતમનુત્તમમ્ ।
ઇત્યેતત્ કથિતં લક્ષ્મિ સારાત્ સારતરં પરમ્ ॥ ૩૦॥

માતૃતીર્થાત્ પિતૃતીર્થાદ્ગુરુતીર્થં મહત્તમમ્ ।
શ્વશ્રૂતીર્થાત્પતિતીર્થાદ્ગુરુતીર્થં મહત્તમમ્ ॥ ૩૧॥

સતીતીર્થાત્ પ્રિયાતીર્થાદ્ગુરુતીર્થં મહત્તમમ્ ।
દેવતીર્થાજ્જડતીર્થાદ્ગુરુતીર્થં મહત્તમમ્ ॥ ૩૨॥

અર્ચાતીર્થાન્મખતીર્થાદ્ગુરુતીર્થં મહત્તમમ્ ।
વ્રતતીર્થાત્તપસ્તીર્થાદ્ગુરુતીર્થં મહત્તમમ્ ॥ ૩૩॥

જ્ઞાનતીર્થાદ્યોગતીર્થાદ્ગુરુતીર્થં મહત્તમમ્ ।
પરોપકારાદિતીર્થેભ્યો ગુરુતીર્થં મહત્તમમ્ ॥ ૩૪॥

અનાદિશ્રીકૃષ્ણનારાયણેન પરમાત્મના ।
મયા સન્દિશ્યતે ત્વેતદ્ગુરુતીર્થં પ્રમાણવત્ ॥ ૩૫॥

સત્યતીર્થં સાધુતીર્થં તીર્થશ્ચાહં પરેશ્વરઃ ।
ત્રીણિ તીર્થાનિ ચૈતાનિ ગુરૌ તીર્થે વિશન્તિ હિ ॥ ૩૬॥

ઇત્યેતચ્છિવરાજ્ઞીશ્રિ હૃદયં કથિતં તવ ।
પઠનાચ્છ્રવણાદસ્ય ચતુઃપુમર્થભાગ્ ભવેત્ ॥ ૩૭॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં તૃતીયે દ્વાપરસન્તાનેલલિતામહાલક્ષ્મ્યાઃ
પઞ્ચત્રિંશદુત્તરશતનામાનિ ગુરુતીર્થમાહાત્મ્યં ચેત્યાદિનિરૂપણનામૈક-
વિંશત્યધિકશતતમોઽધ્યાયઃ ॥ ૧૨૧॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૨૧-અધ્યાયાન્તર્ગતં પુરુષોત્તમપ્રોક્તં શિવરાજ્ઞિશ્રીહૃદયસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૨૧/૧-૩૭॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 121/1-37..

Proofread by PSA Easwaran

---

*Purushottamaproktam Shivarajnishri Hridaya Stotram*
pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*